श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्रीपाण्डुरङ्गाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपाण्डुरङ्गाष्टकम् ॥

महायोगपीठे तटे भीमरथ्या
    वरं पुण्डरीकाय दातुं मुनीन्द्रैः।
समागत्य तिष्ठन्तमानन्दकन्दं
    परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ 1 ॥

तडिद्वाससं नीलमेघावभासं
    रमामन्दिरं सुन्दरं चित्प्रकाशम्।
वरं त्विष्टकायां समन्यस्तपादं
    परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ 2 ॥

प्रमाणं भावाब्धेरिदं मामकानां
    नितम्बः कराभ्यां धृतो येन तस्मात्।
विधातुर्वसत्यै धृतो नाभिकोशः
    परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ 3 ॥

स्फुरत्कौस्तुभालङ्कृतं कण्ठदेशे
    श्रिया जुष्टकेयूरकं श्रीनिवासम्।
शिवं शान्तमीड्यं वरं लोकपालं
    परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ 4 ॥

शरच्चन्द्रबिम्बाननं चारुहासं
    लसत्कुण्डलाक्रान्तगण्डस्थलाङ्गम्।
जपारागबिम्बाधरं कञ्जनेत्रं
    परब्रह्मलिङ्गं भजे पाण्डुरङ्गम् ॥ 5 ॥

किरीटोज्ज्वलत्सर्वदिक्प्रान्तभागं
  सुरैरर्चितं दिव्यरत्नैरनर्घ्यैः।
त्रिभाङ्गाकृतिं बर्हमाल्यावतंसं
  परब्रह्मलिङ्गं भजे पाण्डुरङ्गम्॥ **6**॥

विभुं वेणुनादं चरन्तं दुरन्तं
  स्वयं लीलया गोपवेषं दधानम्।
गवां वृन्दकानन्ददं चारुहासं
  परब्रह्मलिङ्गं भजे पाण्डुरङ्गम्॥ **7**॥

अजं रुक्मिणीप्राणसञ्जीवनं तं
  परं धाम कैवल्यमेकं तुरीयम्।
प्रसन्नं प्रपन्नार्तिहं देवदेवं
  परब्रह्मलिङ्गं भजे पाण्डुरङ्गम्॥ **8**॥

स्तवं पाण्डुरङ्गस्य वै पुण्यदं
  ये पठन्त्येकचित्तेन भक्त्या च नित्यम्।
भवाम्भोनिधिं तेऽपि तीर्त्वाऽन्तकाले
  हरेरालयं शाश्वतं प्राप्नुवन्ति॥ **9**॥

॥ इति श्रीपाण्डुरङ्गाष्टकं समाप्तम्॥